## लघूत्तरीयाः प्रश्नाः

१. ऐतिहासिककाव्यं किमस्ति ?

১. ঐতিহাসিককাব্যং কিমস্তি ?

उत्तर : इतिहासाश्रितं काव्यम् ऐतिहासिककाव्यम्।

উত্তর। ইতিহাসাশ্রিতং কাব্যম্ ঐতিহাসিককাব্যম্।

२. संस्कृत साहित्ये ऐतिहासिककाव्यस्य स्वल्पतायाः कारणं किम् ?

২. সংস্কৃত সাহিত্যে ঐতিহাসিককাব্যস্য স্বল্পতায়াঃ কারণং কিম্ ?

उत्तर : भारतीयानां इतिहासभावना पाश्चात्यभावनायाः भिन्ना। भारतीयेषु इतिहासभावना —

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
प्रर्ववृत्तं कथायुक्तमितिहासः प्रचक्षेत।।

भारतवर्षे चतुवर्गपुरुषार्थसमन्वितः इतिहासः एव इतिहासत्वेन स्वीकृतः न तु पाश्चात्यानुसारं यत् किञ्चित् अतीतवृत्तान्तम्। अथ पाश्चात्यानुसारं इतिहासः संस्कृतसाहित्ये न सुलभः।

উত্তর। ভারতীয়ানাং ইতিহাসভাবনা পাশ্চাত্যভাবনায়াঃ ভিন্না। ভারতীয়েষু ইতিহাসভাবনা—

ধর্মার্থকামমোক্ষাণামুপদেশসমন্বিতম্।
প্রর্ববৃত্তং কথাযুক্তমিতিহাসঃ প্রচক্ষতে।।

ভারতবর্ষে চতুর্বর্গপুরুষার্থসমন্বিতঃ ইতিহাসঃ এব ইতিহাসত্বেন স্বীকৃতঃ ন তু পাশ্চাত্যানুসারং যৎ কিঞ্চিৎ অতীতবৃত্তান্তম্। অথ পাশ্চাত্যানুসারং ইতিহাসঃ সংস্কৃতসাহিত্যে ন সুলভঃ।

३. पाश्चात्यसंज्ञानुसरं इतिहासः कः भवति ?

৩. পাশ্চাত্যসংজ্ঞানুসারং ইতিহাসঃ কঃ ভবতি ?

उत्तर : पुरावृत्तम् इतिहासः।

উত্তর। পুরাবৃত্তম্ ইতিহাসঃ।

४. प्राचीनभारतीयसंज्ञानुसारं इतिहासः कः ?

৪. প্রাচীনভারতীয় সংজ্ঞানুসারং ইতিহাসঃ কঃ ?

उत्तर : चतुर्वर्गपुरुषार्थानामुपदेशसमन्वितं पुरावृत्तम् इतिहासः।

উত্তর। চতুর্বর্গপুরুষার্থানামুপদেশসমন্বিতং পুরাবৃত্তম্ ইতিহাসঃ।

५. संस्कृतसाहित्यस्य श्रेष्ठः इतिहासग्रन्थः कः भवति ?

৫. সংস্কৃতসাহিত্যস্য শ্রেষ্ঠঃ ইতিহাসগ্রন্থঃ কঃ ভবতি?
उत्तर : राजतरङ्गिणी।
উত্তর। রাজতরঙ্গিণী।
६. राजतरङ्गिणीग्रन्थस्य रचयिता कः भवति?
৬. রাজতরঙ্গিণীগ্রন্থস্য রচয়িতা কঃ ভবতি?
उत्तर : कविः कह्लणः।
উত্তর। কবিঃ কহ্লণঃ।
७. कह्लणस्य निवासः कुत्रासीत्?
৭. কহ্লণস্য নিবাসঃ কুত্রাসীৎ?
उत्तर : काश्मीरप्रदेशे।
উত্তর। কাশ্মীরপ্রদেশে।
८. कह्लणस्य समयकालः कोऽस्ति?
৮. কহ্লণস্য সময়কালঃ কোঽস্তি?
उत्तर : ख्री. द्वादशशतकः।
উত্তর। খ্রী. দ্বাদশশতকঃ।
९. कह्लणस्य पृष्ठपोषकः राजा कः आसीत्?
৯. কহ্লণস্য পৃষ্ঠপোষকঃ রাজা কঃ আসীৎ?
उत्तर : अलकदत्तः।
উত্তর। অলকদত্তঃ।
१०. कह्लणस्य पिता कः भवति?
১০. কহ্লণস্য পিতা কঃ ভবতি?
उत्तर : चम्पकः।
উত্তর। চম্পকঃ।
११. चम्पकः कस्य नृपस्य मन्त्री आसीत्?
১১. চম্পকঃ কস্য নৃপস্য মন্ত্রী আসীৎ?
उत्तर : काश्मीरनरेशस्य हर्षस्य।
উত্তর। কাশ্মীরনরেশস্য হর্ষস্য।
१२. राजतरङ्गिण्याः उत्सः कः आसीत्?
১২. রাজতরঙ্গিণ্যাঃ উৎসঃ কঃ আসীৎ?
उत्तर : नीलमतपुराणम्, क्षेमेन्द्रस्य नृपावली, शिलालिपिः–दानलिपिः प्रभृतयः ग्रन्थाः।

উত্তর। নীলমতপুরাণম্, ক্ষেমেন্দ্রস্য নৃপাবলী, শিলালিপিঃ-দানলিপিঃ প্রভৃতয়ঃ গ্রন্থাঃ।

१३. राजतरङ्गिण्याः कति विभागः अस्ति?

১৩. রাজতরঙ্গিণ্যাঃ কতি বিভাগঃ অস্তি?

उत्तर : द्वौ विभागौ–प्रथमभागः द्वितीयभागश्च।

উত্তর। দ্বৌ বিভাগৌ-প্রথমভাগঃ দ্বিতীয়ভাগশ্চ।

१४. राजतरङ्गिण्याः प्रथमभागे किम् आलोचितम्?

১৪. রাজতরঙ্গিণ্যাঃ প্রথমভাগে কিম্ আলোচিতম্?

उत्तर : पुरावृत्तम्।

উত্তর। পুরাবৃত্তম্।

१५. राजतरङ्गिण्याः द्वितीयभागे किम् आलोचितम्?

১৫. রাজতরঙ্গিণ্যাঃ দ্বিতীয়ভাগে কিম্ আলোচিতম্?

उत्तर : समकालीनस्य काश्मीरस्य इतिहासः।

উত্তর। সমকালীনস্য কাশ্মীরস্য ইতিহাসঃ।

१६. वानभट्टेन विरचितम् ऐतिहासिककाव्यं किमस्ति?

১৬. বাণভট্টেন বিরচিতম্ ঐতিহাসিককাব্যং কিমস্তি?

उत्तर : हर्षचरितम्।

উত্তর। হর্ষচরিতম্।

१७. 'हर्षचरितम्' ग्रन्थे कस्य राजवंशस्य इतिहासः पर्यालोचितः?

১৭. 'হর্ষচরিতম্' গ্রন্থে কস্য রাজবংশস্য ইতিহাসঃ পর্যালোচিতঃ?

उत्तर : पुष्यभूतिवंशीयस्य प्रभाकरवर्धनस्य।

উত্তর। পুষ্যভূতিবংশীয়স্য প্রভাকরবর্ধনস্য।

१८. प्रभाकरवर्धनस्य राजधानी कुत्रासीत्?

১৮. প্রভাকরবর্ধনস্য রাজধানী কুত্রাসীৎ?

उत्तर : स्थानीश्वरनगरं।

উত্তর। স্থানীশ্বরনগরে।

१९. इतिहासे प्रभाकरवर्धनस्य श्रेष्ठा कीर्तिः का भवति?

১৯. ইতিহাসে প্রভাকরবর্ধনস্য শ্রেষ্ঠা কীর্তিঃ কা ভবতি?

उत्तर : भारतवर्षात् हूणानां अवलुप्तिः।

উত্তর। ভারতবর্ষাৎ হূণানাং অবলুপ্তিঃ।

२०. प्रभाकरवर्धनस्य द्वौ पुत्रौ कौ स्तः?

उत्तर : राज्यवर्धनः हर्षवर्धनश्च।

উত্তর। রাজ্যবর্ধনঃ হর্ষবর্ধনশ্চ।

२१. प्रभाकरवर्धनस्य कन्या का आसीत्?

২১. প্রভাকরবর্ধনস্য কন্যা কা আসীৎ?

उत्तर : राज्यश्री।

উত্তর। রাজ্যশ্রী।

२२. प्रभाकरवर्धनस्य पत्नी का आसीत्?

২২. প্রভাকরবর্ধনস্য পত্নী কা আসীৎ?

उत्तर : यशोमती।

উত্তর। যশোমতী।

२३. केन सह राज्यश्री विवाहवन्धने आवद्धा अभवत्?

২৩. কেন সহ রাজ্যশ্রী বিবাহবন্ধনে আবদ্ধা অভবৎ?

उत्तर : ग्रहवर्मणा।

উত্তর। গ্রহবর্মণা।

२४. ग्रहवर्मा कस्य राज्यस्य राजा आसीत्?

২৪. গ্রহবর্মা কস্য রাজ্যস্য রাজা আসীৎ?

उत्तर : मालवराज्यस्य।

উত্তর। মালবরাজ্যস্য।

२५. ग्रहवर्मा केन निहतः?

২৫. গ্রহবর্মা কেন নিহতঃ?

उत्तर : शशाङ्केन।

উত্তর। শশাঙ্কেন।

२६. शशाङ्कः कः आसीत्?

২৬. শশাঙ্কঃ কঃ আসীৎ?

उत्तर : शशाङ्कः गौड़ेश्वरः आसीत्।

উত্তর। শশাঙ্কঃ গৌড়েশ্বরঃ আসীৎ।

२७. राज्यवर्धनः केन सह युद्धे निहतः?

২৭. রাজ্যবর্ধনঃ কেন সহ যুদ্ধে নিহতঃ?

उत्तर : शशाङ्केन सह।

উত্তর। শশাঙ্কেন সহ।

२८. हर्षचरितस्य समाप्तिः कविना कथं वर्णिता?

২৮. হর্ষচরিতস্য সমাপ্তিঃ কবিনা কথং বর্ণিতা ?

उत्तर : गौड़ेश्वरेण शशाङ्केन सह युद्धोद्योगे हर्षचरितस्य समाप्तिः दर्शिता।

উত্তর। গৌড়েশ্বরেণ শশাঙ্কেন সহ যুদ্ধোদ্যোগে হর্ষচরিতস্য সমাপ্তিঃ দর্শিতা।

२९. 'नवसाहसाङ्कचरितम्' केन रचितम् ?

২৯. 'নবসাহসাঙ্কচরিতম্' কেন রচিতম্ ?

उत्तर : कविना पद्मगुप्तेन।

উত্তর। কবিনা পদ্মগুপ্তেন।

३०. पद्मगुप्तस्य अपरः नाम कोऽस्ति ?

৩০. পদ্মগুপ্তস্য অপরঃ নাম কোঽস্তি ?

उत्तर : परिमलः।

উত্তর। পরিমলঃ।

३१. नवसाहसाङ्कचरितस्य विषयः कोऽस्ति ?

৩১. নবসাহসাঙ্কচরিতস্য বিষয়ঃ কোঽস্তি ?

उत्तर : राज्ञः मुञ्जस्य जीवनी।

উত্তর। রাজ্ঞঃ মুঞ্জস্য জীবনী।

३२. मुञ्जः कः आसीत् ?

৩২. মুঞ্জঃ কঃ আসীৎ ?

उत्तर : धाराराज्यस्य नृपतिः।

উত্তর। ধারারাজ্যস্য নৃপতিঃ।

३३. मुञ्जस्य वंशः कः आसीत् ?

৩৩. মুঞ্জস্য বংশঃ কঃ আসীৎ ?

उत्तर : परमारराजवंशः।

উত্তর। পরমাররাজবংশঃ।

३४. 'नवसाहसाङ्कचरितम्' काव्ये कति सर्गाः सन्ति ?

৩৪. 'নবসাহসাঙ্কচরিতম্' কাব্যে কতি সর্গাঃ সন্তি ?

उत्तर : अष्टादशः सर्गाः।

উত্তর। অষ্টাদশঃ সর্গাঃ।

३५. 'विक्रमाङ्कदेवचरितम्' केन रचितम् ?

৩৫. 'বিক্রমাঙ্কদেবচরিতম্' কেন রচিতম্ ?

उत्तर : कविविह्लणेन।

३६. विह्लणस्य गोत्रः कः आसीत्?

৩৬. বিহ্লণস্য গোত্রঃ কঃ আসীৎ?

उत्तर : कौशिकगोत्रः।

উত্তর। কৌশিকগোত্রঃ।

३७. विह्लणस्य पष्ठपोषकः कः आसीत्?

৩৭. বিহ্লণস্য পৃষ্ঠপোষকঃ কঃ আসীৎ?

उत्तर : चालुक्यराजः त्रिभुवनमल्लः।

উত্তর। চালুক্যরাজঃ ত্রিভুবনমল্লঃ।

३८. 'विक्रमाङ्कदेवचरिते' कति सर्गाः सन्ति?

৩৮. 'বিক্রমাঙ্কদেবচরিতে' কতি সর্গাঃ সন্তি?

उत्तर : अष्टादशः सर्गाः।

উত্তর। অষ্টাদশঃ সর্গাঃ।

३९. विक्रमाङ्कदेवचरितस्य विषयवस्तु किमस्ति?

৩৯. বিক্রমাঙ্কদেবচরিতস্য বিষয়বস্তু কিমস্তি?

उत्तर : चालुक्यवंशीयनृपाणां विवरणम्।

উত্তর। চালুক্যবংশীয়নৃপাণাং বিবরণম্।

४०. विह्लणस्य पितरौ कौ स्तः?

৪০. বিহ্লণস্য পিতরৌ কৌ স্তঃ?

उत्तर : नागादेवी-ज्येष्ठकलशौ।

উত্তর। নাগাদেবী-জ্যেষ্ঠকলশৌ।

४१. 'विक्रमाङ्कदेवचरितम्' कया रीत्या रचितम्?

৪১. 'বিক্রমাঙ্কদেবচরিতম্' কয়া রীত্যা রচিতম্?

उत्तर : वैदर्भीरीत्या।

উত্তর। বৈদর্ভীরীত্যা।

४२. 'विक्रमाङ्कदेवचरितम्' कीदृशं काव्यम्?

৪২. 'বিক্রমাঙ্কদেবচরিতম্' কীদৃশং কাব্যম্?

उत्तर : इतिहासाश्रितं महाकाव्यम्।

উত্তর। ইতিহাসাশ্রিতং মহাকাব্যম্।

४३. विक्रमाङ्कचरितस्य मुख्यविषयः कोऽस्ति?

৪৩. বিক্রমাঙ্কচরিতস্য মুখ্যবিষয়ঃ কোঽস্তি?

उत्तर : चालुक्यराजविक्रमादित्येन सह करहाटराजकन्यायाः चन्द्रलेखायाः

বিবাহবৃত্তান্তঃ।

উত্তর। চালুক্যরাজবিক্রমাদিত্যেন সহ করহাটরাজকন্যায়াঃ চন্দ্রলেখায়াঃ বিবাহবৃত্তান্তঃ।

४४. 'कर्णसुन्दरी' कीदृशं काव्यम् ?

৪৪. 'কর্ণসুন্দরী' কীদৃশং কাব্যম্ ?

उत्तर : इतिहासाश्रितं नाटकम्।

উত্তর। ইতিহাসাশ্রিতং নাটকম্।

४५. 'कर्णसुन्दरी' रूपकं केन विरचितम् ?

৪৫. 'কর্ণসুন্দরী' রূপকং কেন বিরচিতম্ ?

उत्तर : कविना विह्लणेन।

উত্তর। কবিনা বিহ্লণেন।

४६. 'कुमारपालचरितम्' केन रचितम् ?

৪৬. 'কুমারপালচরিতম্' কেন রচিতম্ ?

उत्तर : हेमचन्द्रेण।

উত্তর। হেমচন্দ্রেণ।

४७. धर्मविश्वासे हेमचन्द्रः कः आसीत् ?

৪৭. ধর্মবিশ্বাসে হেমচন্দ্রঃ কঃ আসীৎ ?

उत्तर : जैनाचार्यः।

উত্তর। জৈনাচার্যঃ।

४८. कुमारपालचरिते कति सर्गाः सन्ति ?

৪৮. কুমারপালচরিতে কতি সর্গাঃ সন্তি ?

उत्तर : अष्टविंशतिः सर्गाः।

উত্তর। অষ্টবিংশতিঃ সর্গাঃ।

४९. द्व्याश्रयकाव्यं किं भवति ?

৪৯. দ্ব্যাশ্রয়কাব্যং কিং ভবতি ?

उत्तर : युगपत् संस्कृतेन प्राकृतेन च रचितं काव्यं द्व्याश्रयकाव्यम्।

উত্তর। যুগপৎ সংস্কৃতেন প্রাকৃতেন চ রচিতং কাব্যং দ্ব্যাশ্রয়কাব্যম্।

५०. द्व्याश्रयकाव्यस्य उदाहरणं दीयताम्।

৫০. দ্ব্যাশ্রয়কাব্যস্য উদাহরণং দীয়তাম্।

उत्तर : कुमारपालचरितम्।

উত্তর। কুমারপালচরিতম্।

५१. 'सोमपालविलासम्' केन रचितम् ?

৫১. 'সোমপালবিলাসম্' কেন রচিতম্?
उत्तर : कविना जह्लणेन।
উত্তর। কবিনা জহ্লণেন।
५२. 'पृथ्वीराजविजयम्' केन रचितम्?
৫২. 'পৃথ্বীরাজবিজয়ম্' কেন রচিতম্?
उत्तर : कविजयानकेन।
উত্তর। কবিজয়ানকেন।
५३. पृथ्वीराजविजयकाव्यस्य विषयः कोऽस्ति?
৫৩. পৃথ্বীরাজবিজয় কাব্যস্য বিষয়ঃ কোঽস্তি?
उत्तर : पृथ्वीराजेन महम्मदघोरिणः पराजयम्।
উত্তর। পৃথ্বীরাজেন মহম্মদঘোরিণঃ পরাজয়ম্।
५४. 'रामपालचरितम्' केन विरचितम्?
৫৪. 'রামপালচরিতম্' কেন বিরচিতম্?
उत्तर : सन्ध्याकरनन्दीमहाभागेन।
উত্তর। সন্ধ্যাকরনন্দীমহাভাগেন।
५५. सन्ध्याकरनन्दिनः समयकालः कोऽस्ति?
৫৫. সন্ধ্যাকরনন্দিনঃ সময়কালঃ কোঽস্তি?
उत्तर : ख्री. द्वादशः शतकः।
উত্তর। খ্রী. দ্বাদশঃ শতকঃ।
५६. रामपालचरितस्य मुख्यविषयः कोऽस्ति?
৫৬. রামপালচরিতস্য মুখ্যবিষয়ঃ কোঽস্তি?
उत्तर : पालवंशीयस्य रामपालस्य जीबनी।
উত্তর। পালবংশীয়স্য রামপালস্য জীবনী।
५७. सन्ध्याकरनन्दीमहाभागस्य जन्मस्थानं किमस्ति?
৫৭. সন্ধ্যাকরনন্দী মহাভাগস্য জন্মস্থানং কিমস্তি?
उत्तर : पुण्ड्रवर्धनः।
উত্তর। পুণ্ড্রবর্ধনঃ।
५८. सन्ध्याकरनन्दिनः पिता कः आसीत्?
৫৮. সন্ধ্যাকরনন্দিনঃ পিতা কঃ আসীৎ?
उत्तर : प्रजापतिः नन्दी।
উত্তর। প্রজাপতিঃ নন্দী।

५९. रामपालचरितस्य समयकालः कः आसीत् ?

৫৯. রামপালচরিতস্য সময়কালঃ কঃ আসীৎ?

उत्तर : ख्री. द्वादशशतकः।

উত্তর। খ্রী. দ্বাদশশতকঃ।

६०. 'रामपालचरितम्' केन छन्दसा रचितम् ?

৬০. 'রামপালচরিতম্' কেন ছন্দসা রচিতম্?

उत्तर : आर्याछन्दसा।

উত্তর। আর্যাছন্দসা।

६१. रामपालचरिते कियन्तः श्लोकाः सन्ति ?

৬১. রামপালচরিতে কিয়ন্তঃ শ্লোকাঃ সন্তি ?

उत्तर : २२० श्लोकाः।

উত্তর। ২২০ শ্লোকাঃ।

६२. रामपालचरिते कियन्तः परिच्छदाः सन्ति ?

৬২. রামপালচরিতে কিয়ন্তঃ পরিচ্ছদাঃ সন্তি?

उत्तर : चत्वारः।

উত্তর। চত্বারঃ।

६३. 'गौड़वधम्' केन विरचितम् ?

৬৩. 'গৌড়বধম্' কেন বিরচিতম্?

उत्तर : वाक्पतिराजेन।

উত্তর। বাক্পতিরাজেন।

६४. गौड़वधस्य प्राकृतनाम किमस्ति ?

৬৪. গৌড়বধস্য প্রাকৃতনাম কিমস্তি?

उत्तर : गउड़वहो।

উত্তর। গউড়বহো।

६५. गौड़वधम् केन छन्दसा रचितम् ?

৬৫. গৌড়বধম্ কেন ছন্দসা রচিতম্?

उत्तर : आर्याछन्दसा।

উত্তর। আর্যাছন্দসা।

६६. गौड़वधे कियन्तः श्लोकाः वर्तन्ते ?

৬৬. গৌড়বধে কিয়ন্তঃ শ্লোকাঃ বর্তন্তে?

उत्तर : १००८ श्लोकाः।

উত্তর। ১০০৮ শ্লোকাঃ।

৬৭. गौड़वधस्य विषयवस्तु किमस्ति?

৬৭. গৌড়বধস্য বিষয়বস্তু কিমস্তি?

उत्तर : कनौजराजेन यशोवर्मना गौड़ेश्वरस्य पराजयकाहिनी।

উত্তর। কনৌজরাজেন যশোবর্মনা গৌড়েশ্বরস্য পরাজয়কাহিনী।

৬৮. 'शिवभारतम्' केन विरचितम्?

৬৮. 'শিবভারতম্' কেন বিরচিতম্?

उत्तर : कवीन्द्रपरमानन्देन।

উত্তর। কবীন্দ্রপরমানন্দেন।

৬৯. शिवभारते कियन्तः सर्गाः सन्ति?

৬৯. শিবভারতে কিয়ন্তঃ সর্গাঃ সন্তি?

उत्तर : द्वात्रिंशत् सर्गाः।

উত্তর। দ্বাত্রিংশৎ সর্গাঃ।

৭০. शिवभारतस्य विषयवस्तु किमस्ति?

৭০. শিবভারতস্য বিষয়বস্তু কিমস্তি?

उत्तर : छत्रपतिशिवाजीमहाराजस्य गौरवम्।

উত্তর। ছত্রপতিশিবাজীমহারাজস্য গৌরবম্।

৭১. 'राष्ट्रौढ़वंशकाव्यम्' केन विरचितम्?

৭১. 'রাষ্ট্রৌঢ়বংশকাব্যম্' কেন বিরচিতম্?

उत्तर : रुद्रकविना।

উত্তর। রুদ্রকবিনা।

৭২. 'राष्ट्रौढ़वंशम्' इति काव्यस्य विषयवस्तु किम्?

৭২. 'রাষ্ট্রৌঢ়বংশম্' ইতি কাব্যস্য বিষয়বস্তু কিম্?

उत्तर : मयूरगिरिराजस्य नारायणसाहस्य प्रशस्तिः।

উত্তর। ময়ূরগিরিরাজস্য নারায়ণসাহস্য প্রশস্তিঃ।